

# ॥ श्री सरस्वती स्तोत्रम् ॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ १॥
दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिनिभैरक्षमालान्दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ २॥
सुरासुरसेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सदा ॥ ३॥
सरस्वती सरसिजकेसरप्रभा तपस्विनी सितकमलासनप्रिया।
घनस्तनी कमलविलोललोचना मनस्विनी भवतु वरप्रसादिनी ॥ ४॥
सरस्वति नमस्तुभ्यं वरदे कामरूपिणि। विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ ५॥
सरस्वति नमस्तुभ्यं सर्वदेवि नमो नमः। शान्तरूपे शशिधरे सर्वयोगे नमो नमः ॥ ६॥
नित्यानन्दे निराधारे निष्कलायै नमो नमः। विद्याधरे विशालाक्षि शुद्धज्ञाने नमो नमः ॥ ७॥
शुद्धस्फटिकरूपायै सूक्ष्मरूपे नमो नमः। शब्दब्रह्मि चतुर्हस्ते सर्वसिद्ध्यै नमो नमः ॥ ८॥
मुक्तालङ्कृतसर्वाङ्ग्यै मूलाधारे नमो नमः। मूलमन्त्रस्वरूपायै मूलशक्त्यै नमो नमः ॥ ९॥
मनो मणिमहायोगे वागीश्वरि नमो नमः। वाग्भ्यै वरदहस्तायै वरदायै नमो नमः ॥ १०॥
वेदायै वेदरूपायै वेदान्तायै नमो नमः। गुणदोषविवर्जिन्यै गुणदीप्त्यै नमो नमः ॥ ११॥
सर्वज्ञाने सदानन्दे सर्वरूपे नमो नमः। सम्पन्नायै कुमार्यै च सर्वज्ञे नमो नमः ॥ १२॥
योगानार्य उमादेव्यै योगानन्दे नमो नमः। दिव्यज्ञान त्रिनेत्रायै दिव्यमूर्त्यै नमो नमः ॥ १३॥
अर्धचन्द्रजटाधारि चन्द्रबिम्बे नमो नमः। चन्द्रादित्यजटाधारि चन्द्रबिम्बे नमो नमः ॥ १४॥
अणुरूपे महारूपे विश्वरूपे नमो नमः। अणिमाद्यष्टसिद्ध्यायै आनन्दायै नमो नमः ॥ १५॥
ज्ञानविज्ञानरूपायै ज्ञानमूर्ते नमो नमः। नानाशास्त्रस्वरूपायै नानारूपे नमो नमः ॥ १६॥
पद्मदा पद्मवंशा च पद्मरूपे नमो नमः। परमेष्ठ्यै परामूर्त्यै नमस्ते पापनाशिनि ॥ १७॥
महादेव्यै महाकाल्यै महालक्ष्म्यै नमो नमः। ब्रह्मविष्णुशिवायै च ब्रह्मनार्यै नमो नमः ॥ १८॥
कमलाकरपुष्पा च कामरूपे नमो नमः। कपालि कर्मदीप्तायै कर्मदायै नमो नमः ॥ १९॥
सायं प्रातः पठेन्नित्यं षण्मासात् सिद्धिरुच्यते। चोरव्याघ्रभयं नास्ति पठतां शृण्वतामपि ॥ २०॥
इत्थं सरस्वतीस्तोत्रम् अगस्त्यमुनिवाचकम्। सर्वसिद्धिकरं नृणां सर्वपापप्रणाशणम् ॥ २१॥

॥ इति श्री अगस्त्यमुनिप्रोक्तं सरस्वतीस्तोत्रं सम्पूर्णम् ॥

वैदिक जीवन™
Sanatan Online Store
www.vaidikjeevn.com
Ver 1.0.0
7706011555
www.vaidikjeevn.com